| अथोपपातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णोदानम्। | दक्षिणा। |
|---|---|---|---|---|
| | अत्यन्ताभ्यासे द्वादशवार्षिकव्रतम्। इत्युपपातके अगम्यागमनप्रायश्चित्तं समाप्तम् ॥ * ॥ | १८० धेनवः। | ५४० कार्षापणाः। | १०० गावः। अशक्तौ १०० कार्षापणाः। |
| अथ परिवेदनादि। | ज्येष्ठेऽनिविंष्टे कनीयान्निर्व्विशन् परिवेत्ता परिवित्तो ज्येष्ठः। परिवेदनीया कन्या परिदायी दाता। परिकर्त्ता याजकः। ते सर्व्वे पतिताः। एतेषां प्रायश्चित्तम्। | | | |
| | संवत्सरं प्राजापत्यम्। एतत् कामतः। अकामतोऽर्द्धम्। अत्रापवादः। "देशान्तरस्थक्लीवैकवृषणानसहोदरान्। वेश्याभिसक्तपतितशूद्रतुल्यातिरोगिणः॥ जड़मूकान्धवधिरकुब्जवामनकुण्ठकान्। अतिवृद्धानभार्य्यांश्च कृषिसक्तान्नृपस्य च। धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा। कुलटोन्मत्तचौरांश्च परिविन्दन्न दुष्यति॥" | ३० धेनवः। | ८० कार्षापणाः। | १७ गावः। अशक्तौ १६॥≠१६। कार्षापणाः। |
| व्रात्यत्वम् अर्थात् सावित्रीपतितत्वम्। पञ्चदशाब्दपर्य्यन्तमुपनयनाभावे ब्राह्मणस्य व्रात्यत्वम्। एकविंशतिवर्षपर्य्यन्तमुपनयनाभावे क्षत्रियस्य व्रात्यत्वम्। त्रयोविंशतिवर्षपर्य्यन्तमुपनयनाभावे वैश्यस्य व्रात्यत्वम्। | पितृमातृरहितनिःस्वजनस्य सावित्रीपाते प्राजापत्यत्रयम्। यथाविध्युपनयनञ्च। आलस्यानवधानादिना सावित्रीपाते तु व्रात्यस्तोमयागः। | ३ धेनवः। | ८ कार्षापणाः। | यथाशक्ति। |
| | तद्वैकल्पिकं दिनत्रयाधिकमासचतुष्टयसमाप्यमुद्दालकव्रतम्। तद्व्रतं यथा। द्वौ मासौ यावकेनवर्त्तयेत् मासं पयसा अर्द्धमासमामिक्षया अष्टरात्रं घृतेन षड्रात्रमयाचितं त्रिरात्रमब्भक्षः अहोरात्रमुपवसेत्। | सपादनवधेन्वसम्भवात् १० धेनवः। | २७॥० कार्षापणाः। | यथाशक्ति। |
| | देशोपप्लवादिना सावित्रीपतने एकविंशतिरात्रं प्रसृतिमितयावकपानम्। तत उपनयनम्। | ४ धेनवः। | ८॥० कार्षापणाः। | यथाशक्ति। |
| अथावकीर्णन्। अर्थाद्ब्रह्मचारिणः योषिद्गमनम्। | षण्मासं ब्रह्महत्याव्रतम्। खरचर्मपरिधानञ्च। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | ५ गावः। अशक्तौ ४≠१४ कार्षापणाः। |
| | अभ्यासे संवत्सरं ब्रह्महत्याव्रतम्। | १५ धेनवः। | ४५कार्षापणाः। | ८ गावः। अशक्तौ ८।/६॥ कार्षापणाः। |
| पितृष्वसृसुतादिपरिणयनम्। आदिना मातृष्वसृसुतामातुलसुतामातामहसपिण्डा सगोत्रासमानप्रवरादीनां ग्रहणम्। | चान्द्रायणम्। | सार्द्धसप्तधेन्वसम्भवात् ८धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| | त्यागानन्तरं मातृवद्भरणम्। एतत्ज्ञानतः अज्ञाने कृच्छ्राब्दपादः। | ४ धेनवः। | ११।० कार्षापणाः। | यथाशक्ति। |
| अग्न्युत्सादनम्। अर्थात् अग्निहोत्रिणामग्नित्यागः। | कामतः संवत्सरोत्सन्ने चान्द्रायणम्। | सार्द्धसप्तधेन्वसम्भवात्८धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| | द्विवर्षोत्सन्ने सोमायनचान्द्रायणे। एतदनुसारेणोनाधिककालयारुह्यम्। | सार्द्धाष्टधेन्वसम्भवात् ९ धेनवः। | २५॥० कार्षापणाः। | यथाशक्ति। |
| गृहस्थस्य चिरतरकालानग्नित्वम्। | गोवधोक्तं मासिकव्रतम्। अल्पकाले अनाधाने च चान्द्रायणम्। | १२ धेनवः। | ३६ कार्षापणाः। | १० गावः। १ वृषः। अशक्तौ १५ कार्षापणाः। |